दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-10 ■ वर्ष-5 ■ अङ्क-317 | 1 | सितम्बर 06, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् भाद्रपदकृष्णदशमी
भाद्रपद 21 प्रविष्टांशः मङ्गलमयः भवेत्

2 अष्टचत्वारिंशत् शिक्षकेभ्यः राष्ट्रिय पुरस्कारानपि प्रदत्तवती राष्ट्रपतिः

4 राज्य-शिक्षक-पुरस्कारेण ३२ शिक्षकाः सम्मानिताः; 'वन्दे मातरम्' इत्यस्य सर्वेषां छन्दसां (पदानां) ध्वन्या आरभः समापनं च

9 किं भवन्तः जानन्ति? पिपीलिकाः (Ants) कदापि न स्वपन्ति! ताः सम्पूर्णे दिवसे केवलं लघु-विरामान् (विश्रामं) स्वीकुर्वन्ति, किन्तु मानवाः इव गाढ-निद्रां न गच्छन्ति।

## अद्यतनीयं सुभाषितम्

**क्षमा बलमशक्तानां शक्तानां भूषणं क्षमा।**
**क्षमा वशीकृते लोके क्षमया किन्न सिद्ध्यति॥**

अर्थात्- क्षमा निर्बलों का बल है, क्षमा बलवानों का आभूषण है, क्षमा ने इस विश्व को वश में किया हुआ है, क्षमा से कौन सा कार्य सिद्ध नहीं हो सकता?

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा






# मिस वर्ल्ड २०२६: विश्वस्य नूतना सौन्दर्यराज्ञी प्राप्ता, डोमिनिकन-गणराज्यस्य जोहेरी मोल-महोदयया प्राप्तम् मुकुटम्

मिस वर्ल्ड २०२६ इत्यस्य भव्य-अन्तिमे चक्रे डोमिनिकन-गणराज्यस्य जोहेरी मोल डोमिंग्वेज् (Joheirry Mola Dominguez) स्वस्य उत्कृष्ट-प्रदर्शनेन इदं पदं स्वनामधेये कृतवती। वियतनाम-देशस्य न्हा ट्रांग नगरे आयोजिते अस्मिन् भव्य-अन्तिमे चक्रे विश्वस्य बहुभ्यः देशेभ्यः सुन्दर्यः भागं गृहीतवत्यः। पूर्वतन-मिस-वर्ल्ड ओपल सुचाता चुआंग्सरी स्वहस्ताभ्यां जोहेरी मोल-महोदयायै मिस वर्ल्ड २०२६ इत्यस्य मुकुटम् अधारयत्। मुकुट-धारणानन्तरं जोहेरी अतीव भावुका अभवत्, तस्याः मुखे च विजयस्य आनन्दः स्पष्टतया दृष्टः। प्रतियोगितायाः प्रारम्भात् एव सा स्वसौन्दर्येण, आत्मविश्वासेन, प्रभावशालि-व्यक्तित्वेन च जनानां ध्यानम् आकृष्टवती। सा विविधेसु सोपानेषु श्रेष्ठं प्रदर्शनं कुर्वती अन्तिम-चक्रं यावत् स्थानं निश्चितवती, अन्ते च सर्वश्रेष्ठं मुकुटं प्राप्तुं साफल्यम् अलभत।

### स्पेन-मलेशिया-देशयोः सुन्दरीभ्याम् अपि महत् स्थानं प्राप्तम्

अस्यां प्रतियोगितायां स्पेन-देशस्य एलिजाबेथ रेयनेस अलाबर्न 'प्रथम-उपविजेत्री' (फर्स्ट रनर-अप) अभवत्। सा अपि सम्पूर्ण-स्पर्धायां प्रशंसनीयं प्रदर्शनं कृत्वा अन्तिम-सोपानं यावत् दृढां प्रतियोगिताम् अयच्छत्। एतदतिरिच्य मलेशिया-देशस्य तानुसिया चेट्टी 'द्वितीय-उपविजेत्री' (सेकण्ड रनर-अप) अभवत्। एवं मिस वर्ल्ड २०२६ इत्यस्य शीर्ष-त्रिषु स्थानेषु डोमिनिकन-गणराज्यस्य, स्पेनस्य, मलेशिया-देशस्य च सुन्दर्यः स्वस्थानम् अकुर्वन्। जोहेरी-महोदयायाः अनेन विजयेन सह डोमिनिकन-गणराज्यस्य नाम्नि मिस वर्ल्ड २०२६ इत्यस्य प्रतिष्ठितम् अभिधानम् अङ्कितम् अभवत्।

## का अस्ति जोहेरी मोल डोमिंग्वेज्?

जोहेरी एका शिक्षिका, वार्ता-प्रतिनिधिः (न्यूज कॉरेस्पॉन्डेंट), समाज-सेवा-सम्बद्धा प्रतिदर्शिका (मॉडल) च अस्ति। मिस वर्ल्ड इत्यस्य परिचयानुसारं सा 'Voices of Tomorrow' इति संस्थायाः संस्थापनम् अकरोत्, येन दुर्बल-वर्गाणां बालकेभ्यः युवकेभ्यः च आङ्ग्ल-भाषायाः शिक्षा प्रसार्यते।

### शीर्ष-४० मध्ये भारतस्य निकिता पोरवाल-महोदयया स्थानं प्राप्तम्

भारतस्य निकिता पोरवाल शीर्ष-४० तमं स्थानं यावत् प्राप्तवती, किन्तु शीर्ष-२० मध्ये स्थानं लब्धुं न अशक्नोत्। अर्थात् अस्यां प्रतियोगितायां भारतस्य यात्रा शीर्ष-४० सोपाने एव समाप्ता अभवत्। उज्जयिन्यां जाता निकिता प्रतिदर्शनेन (मॉडलिंग्) सह अभिनयेन रङ्गमञ्चेन च सह अपि संलग्ना अस्ति। सा बहुषु नाट्य-प्रकल्पेषु कार्यं कृतवती, षष्ट्यधिकेषु (६०+) नाटकेषु च भागम् अगृह्णात् इति कथ्यते।

निकिता पोरवाल-महोदयायाः यात्रा बहुभिः दृष्ट्या अतीव विशिष्टा आसीत्। विश्वस्य विविध-देशेभ्यः आगतानां सुन्दरीणां प्रतिभावतीनां च प्रतिभागिनां मध्ये निकिता स्वस्य पृथक् परिचयम् अस्थापयत्, यतः सा केवलं सौन्दर्येण शैली-माध्यमेन च न, अपितु स्वकलया, भारतीय-संस्कृत्या, समाज-कल्याण-कार्यैः च जनानां ध्यानम् आकृष्टवती।






# अष्टचत्वारिंशत् शिक्षकेभ्यः राष्ट्रिय पुरस्कारानपि प्रदत्तवती राष्ट्रपतिः

राष्ट्रपतिपदासीना द्रौपदी-मुर्मुः उदघोषयत् यत् विकसित-भारतस्य स्वप्नः तदैव सत्यतामेष्यति यदा शिक्षा-गुणवत्तापूर्णा सम्भविष्यति। शिक्षक-दिवसावसरे नवदेहल्याम् आयोजिते षड्विंशत्यधिक-द्विसहस्रतमस्य राष्ट्रिय-शिक्षक-पुरस्कार-समारोहे सम्बोधयन्ती सा प्रावोचत् यत् यः समाजः शिक्षकानाम् आदरं विदधाति, स एव वस्तुतः प्रगतिशीलः समाजः मन्यते। राष्ट्रपतिः प्रत्यपादयत् यत् अस्माकं संविधाने निहितस्य समानावसरस्य यथार्थ-प्राप्तौ शिक्षैव सर्वोत्कृष्टं साधनं वर्तते। प्राथमिक विद्यालयेषु छात्राणां विद्यात्याग-मानाङ्कस्य दूरीकरणे शिक्षकाणां प्रयासाः एव हेतुभूताः सन्ति। सा न्यरूपयत् यत् शैक्षिक-उत्कृष्टता, कौशल-संवर्धनम्, उद्यमिता च राष्ट्रस्य विकासे निर्णायकं योगदानम् आवहन्ति। भारतं ज्ञान-शक्तिम् विधाय जगति कौशल-राजधानीत्वेन प्रतिष्ठापयितुं देशस्य प्राथमिकता। सा प्रतिपादितवती यत् ज्ञानं शक्त्याः महत्तरः स्रोतः अस्ति, यत् जनं स्वातन्त्र्येण चिन्तयितुं, सुविज्ञातान् निर्णयान् ग्रहीतुं, राष्ट्र-विकासे सार्थकम् अवदानं दातुं च सामर्थ्यं प्रयच्छति। राष्ट्रपतिवर्या अवदत् यत् कर्तव्य-निष्ठाः शिक्षकाः राष्ट्र-निर्माणस्य अग्रिम-पतौ तिष्ठन्तः शिल्पिनः सन्ति। राष्ट्रपतिना नारीणाम् अधिकार-संरक्षणाय सावित्रीबाई-फुले-महोदयायाः पावन-स्मृतिरपि सप्रश्रयं समुद्भाविता। अत्रावसरे राष्ट्रपति-महोदया राष्ट्रिय-शिक्षक-पुरस्कारान् समर्पयत्। सप्तविंशति-राज्येभ्यः, सप्तकेन्द्रशासित प्रदेशेभ्यः, केन्द्र-सर्वकारस्य षड्भ्यः स्वायत्त-सङ्घटनेभ्यश्च चिताः अष्टचत्वारिंशत् विद्यालयीयाः अध्यापकाः एतान् पुरस्कारान् प्राप्तवन्तः। सहैव राष्ट्रपतिः उच्च-शिक्षण संस्थानानां अथ च पॉलिटेक्निक्-संस्थानानां एकविंशति-प्राध्यापकेभ्यः राष्ट्रिय-सम्मानं प्रायच्छत्।

# छात्राणां जीवन-संस्काराय पाठ्यपुस्तकेभ्यः परं गन्तुं शिक्षकान् समाहूतवान् प्रधानमन्त्री नरेन्द्रमोदी



प्रधानमन्त्री नरेन्द्रमोदी अध्यापकान् समाहूतवान् यत् ते केवलं पाठ्यपुस्तकेषु आत्मानं न बद्ध्वा छात्राणां जीवन-संस्कारे बाल्य-भावस्य सुरक्षायै महत्तरं दायित्वं निर्वहेयुः। गतदिने नवदेहल्यां राष्ट्रिय-शिक्षक-पुरस्कार-विजेतृभिः सह संवादं कुर्वन् श्रीमोदी एतान् विचारान् न्यरूपयत्। सामाजिक-सञ्चार-पटले अस्य संवादस्य कतिपयान् दृश्यक्षणान् संयोज्य प्रेषिते एकस्मिन् सन्देशे प्रधानमन्त्रिणा विशेषतया बलं दत्तं यत् शिक्षकाः सुनिश्चिनुयुः यत् प्रत्येकस्मिन् छात्रे विद्यमानः बालकः सदा सजीवः तिष्ठेत् तदर्थं शिक्षकाः स्वान्तर्गतम् अपि बाल्य-भावं रक्षयेयुः। सः प्रत्यपादयत् यत् बालकेषु वास्तविक परिवर्तनम् आनेतुं शिक्षकाः केवलं पाठ्यक्रमे सीमिताः न भूत्वा तेषां समग्र-जीवनेन सह एकीभवेयुः। स्वास्थ्य-सामाजिक-प्रकरणेषु कथयन् श्रीमोदी बालकेषु प्रवर्धमानां पटल-दर्शन-व्यसनम् प्रति गभीरां चिन्ताम् प्रकटितवान्। अस्य पटल-व्यसनस्य उपशमनाय सः क्रीडा-प्रोत्साहनं, बहिः क्रीडा प्रवृत्तिः, सर्जनात्मक कार्याणि च प्रभावशालिनः उपायाः सन्तीति व्यचारयत्। राष्ट्रिय-शिक्षा-नीतेः प्रसङ्गमादाय श्रीमोदी अवदत् यत् बालकाः कक्षा-भित्तिभ्यः बहिः नीत्वा व्यावहारिक-कौशलैः कर्म-रूपैश्च सह संयोजनीयाः।

## प्रधानमन्त्री नरेन्द्रमोदी शिक्षक-दिवसावसरे राष्ट्रपतिनः द्रौपदी-मुर्मुवर्यायाः एकं विशिष्टम् आलेखं सामाजिक-सञ्चार-पटले प्रासारयत्

प्रधानमन्त्री नरेन्द्रमोदी शिक्षक-दिवसावसरे राष्ट्रपतिनः द्रौपदी-मुर्मुवर्यायाः एकं विशिष्टम् आलेखं सामाजिक-सञ्चार-पटले प्रासारयत्। स्वीये सन्देशे श्रीमोदी अलिखत् यत् अयम् आलेखः अध्यापन-कर्म मानवतायाः नव-निर्माणस्य, स्वतन्त्र चिन्तनस्य, जिज्ञासा-भावस्य च प्रवर्धनार्थं पवित्रकार्यत्वेन सविस्तरं प्रस्तौति। सः न्यरूपयत् यत् राष्ट्रपतिः छात्रान् उत्तम-मानवरूपेण निर्मातुं शिक्षकाणां समाह्वानं कृतवती। येन छात्राः संस्कृतिक-न्यासम्, वैज्ञानिक-दृष्टिकोणम्, अन्त्योदय-आदर्शम्, पर्यावरण-संरक्षणं, राष्ट्र सर्वोपरि इति भावनाञ्च हृदये धारयेयुः। आलेखे विशेषतया एतत् प्रतिपादितं यत् अध्यापकाः ज्ञानेन, कौशलेन, जीवन-मूल्यैः, आन्तरिक-प्रेरणया च जनानां जीवनं रक्षयन्ति।



# प्रधानमन्त्री नरेन्द्रमोदी नवदेहल्यां श्री राम कॉलेज-ऑफ़-कॉमर्स इत्यस्य शताब्दी-समारोहं सम्बोधितवान्

प्रधानमन्त्री नरेन्द्रमोदी नवदेहल्यां श्री राम-कॉलेज-ऑफ़-कॉमर्स इत्यस्य शताब्दी-समारोहे सोत्साहं भागं भजितवान्। अत्रावसरे श्रीमोदी सभामपि सम्बोधितवान्।

दिल्ली-विश्वविद्यालयस्य शीर्ष-घटक-रूपेण प्रतिष्ठितः श्री राम कॉलेज ऑफ़ कॉमर्स इत्येतत् भारतस्य उच्च-शिक्षा-संस्थानेषु अग्रगण्यः मन्यते। अयं महाविद्यालयः वाणिज्ये, अर्थशास्त्रे, प्रबन्धने च उच्च-स्तरीय-विद्याभ्यासस्य विशिष्टं केन्द्रम् अस्ति। प्रधानमन्त्रिणा कथितं यत् एस.आर.सी.सी. (SRCC) इति संस्थानेन वर्षानुवर्षं छात्राणां बहूनां पीढीनाम् अध्ययनाय, प्रगतये, समाजे च परिवर्तनम् आनेतुम् अवसरः प्रदत्तः। सः अवदत् यत् अस्मिन् महाविद्यालयेन वर्षेभ्यः शैक्षणिक-उत्कृष्टतायाः क्षेत्रे स्वकीया विशिष्टा प्रतिष्ठा स्थापिता। सः अस्य महाविद्यालयस्य पूर्वछात्रान् अतीव विशिष्टान् न्यवेदयत्।




# भारतस्य प्रधानन्यायाधीशः सूर्यकान्तः नवदेहल्यां जायमाने ब्रिक्स-मुख्यन्यायाधीश-मञ्चे स्वस्थ-असहमतेः विमर्श-संस्कृतेश्च महत्त्वं प्रतिपादितवान्

भारतस्य मुख्यन्यायाधीशः सूर्यकान्तः स्वस्थमतभिन्नतायाः विचार-विमर्शस्य च संस्कृतेः महत्त्वम् अधोरेखितवान्। नवदेहल्याम् आयोक्ष्यमाणस्य ब्रिक्स्-मुख्यन्यायाधीशानां मञ्चस्य अंशत्वेन भारतस्य मुख्यन्यायाधीशेन ब्रिक्स्-सदस्यराष्ट्राणां, सहभागीराष्ट्राणां च प्रतिनिधिमण्डलं सम्बोधितम्। समयोचितं पूर्वानुमेयं च न्यायदानम् आवश्यकम् इति सः अस्मिन् विषये बलं प्रदत्तवान्। सः स्मरणम् अकरोत् यत् कथं नालन्दा-विश्वविद्यालयः अत्यन्तं प्रख्यातं शैक्षणिककेन्द्रम् आसीत् यत्र समग्रविश्वस्य छात्राः संशोधकाः च विना कस्यापि भेदभावेन बाधया वा प्रवेशिताः आसन्। सः अग्रे अवदत् यत् ब्रिक्स्-देशः सजीव-नालन्दा-विश्वविद्यालयः इति नाम्ना अपि प्रसिद्धः भवेत्। अद्यतनं उपवेशनं ब्रज़िल्-देशस्य सर्वोच्चसङ्घीयन्यायालयस्य अध्यक्षः लूयिज़ एडसन् फचिनः, चीनदेशस्य मुख्यन्यायाधीशः झाङ्ङ् जूनादयः अपि सम्बोधितवन्तः। मध्यस्थतायाः विषये एकस्मिन् सत्रे भाषमाणः, न्यायमूर्तिः सूर्यकान्तः अवधानं दत्तवान् यत् यथा यथा देशानां मध्ये व्यापारः वर्धते, व्यवसायानां कृते विवाद-निराकरण-तन्त्रस्य आवश्यकता भविष्यति । सः मध्यस्थ-संस्थानां मध्ये सहयोगस्य सुदृढीकरणाय, व्यावसायिक-प्रशिक्षणाय, बहुभाषीय क्षमतायै, न्यायाधीशेषु, मध्यस्थेषु, अधिवक्तृषु, व्यवसायेषु च मध्ये संवादाय च आह्वानम् अकरोत्।

# जलौघ-प्रभाविताय नेपाल-देशाय भारतेन पञ्चनवति-टन-परिमिता सहायता-सामग्री प्रेषिता



विदेशमन्त्रालयः अवदत् यत्, नेपालदेशस्य जलाप्लावितात् त्रिशुली-आपण-क्षेत्रात् पञ्चवर्षीय-बालकेन सह इतोऽपि त्रयः भारतीयाः नागरिकाः रक्षिताः इति, येन रक्षितानां भारतीयानां सङ्ख्या एकोनसप्तत्यधिकैक-शतम् अभवत्। एम्. ई. ए. प्रवक्ता रणधीर जायसवालः अवदत् यत् पञ्चसप्तत्यधिक द्विशतं यावत् भारतीयाः नागरिकाः लुप्ताः सन्ति। प्रवक्ता अवदत् यत्, गतमासस्य षड्विंशति दिनाङ्के नेपालदेशे विनाशकारि-आकस्मिकजलाप्लावनात् आरभ्य भारतेन नेपालदेशाय प्रायः पञ्चनवति-टन्मिता साहाय्यसामग्री प्रेषिता। विदेशमन्त्रालयस्य प्रवक्ता अवदत् यत्, नेपालस्य सर्वकारस्य आवश्यकतानुसारं भारतं नेपालाय निरन्तरं साहाय्यं प्रदास्यति। अत्रान्तरे, हिमालयीये राष्ट्र-जलाप्लावनेन मृतकानां सङ्ख्या चतुश्चत्वारिंशोत्तरत्रिशताधिकैक-सहस्रं यावत् वर्धिता।

# हिमाचल-उच्चन्यायालयस्य निर्णयः

## नियमितीकरणानन्तरं समग्रा अनुबन्ध-सेवा भवेत् मान्या; त्रिषु मासेषु देयाः अवशिष्टाः वित्तीय-लाभाः




**हिमसंस्कृतवार्ता — शिमला।**
हिमाचलप्रदेश-उच्चन्यायालयेन अनुबन्ध-आधार-नियुक्त-कर्मचारिणां हिते महत्त्वपूर्णः निर्णयः उद्घोषितः। न्यायालयेन स्पष्टीकृतं यत् यदि कर्मचारिणां नियुक्तिः 'नियुक्तिः एवं पदोन्नतिः' (R&P Rules) नियमानाम् अन्तर्गतं विज्ञापनं प्रसार्य, सम्पूर्ण-चयन-प्रक्रियां सम्पाद्य, स्वीकृतेषु पदेषु कृता आसीत्, तर्हि नियमितीकरणस्य अनन्तरं तेषां समग्रा अनुबन्ध-कालावधिः (Contract Period) सेवा-लाभाय परिगणिष्यते। एतेषु वरिष्ठता, वार्षिक-वेतन-वृद्धिः, वेतन-निर्धारणं, पदोन्नतिः, निवृत्तिवेतन-सम्बद्धाः लाभाश्च समाविष्टाः सन्ति।न्यायमूर्तेः जियालालभारद्वाजस्य एकल-पीठेन प्रोक्तं यत् याचिकाकर्तॄणां नियुक्तिः निर्धारितानुसारं पूर्ण-प्रक्रियया संजाता, अतः अनुबन्ध-कालावधिं सेवा-लाभेभ्यः पृथक् कर्तुं न शक्यते। न्यायालयेन एतदपि प्रोक्तं यत् यतोहि याचिकाकर्तारः समये एव न्यायालयस्य शरणम् आगताः आसन्, अतः तेभ्यः प्रारम्भिक-नियुक्ति-तिथेः देयाः सर्वे वित्तीय-लाभाः प्रदीयेरन्।न्यायालयेन सर्वकाराय निर्देशाः दत्ताः यत् आदेश-प्राप्तेः त्रिषु मासेषु कर्मचारिणां लम्बितानां वित्तीय-लाभानां भुक्तिः क्रियेत। निर्धारित-कालावधौ भुक्ति-अप्रदाने सति, अवशिष्ट-राशौ भुक्ति-दिनाङ्कं यावत् षट्-प्रतिशतं (६%) वार्षिक-ब्याजम् अपि दातव्यं भविष्यति।अयं निर्णयः मनोजकुमार-अजयकुमार-भूपेन्द्रपाल-प्रभृतीनां पक्षतः प्रविष्टानां विविधानां याचिकानां संयुक्तायां श्रवण्यां (Hearing) श्रावितः। याचिकाकर्तृभिः २०१० तमे वर्षे प्रसारितेन विज्ञापनेन भाषा-अध्यापक-टीजीटी (चिकित्सा)-ड्रॉइंगमास्टर-पदेभ्यः आवेदनं कृतम् आसीत्। तैः विहित-नियमानुसारं लिखित-परीक्षायां साक्षात्कारे च सफलता प्राप्ता। तथापि सर्वकारेण तान् तत्क्षणमेव नियमित-नियुक्तिं दानापेक्षया २०१२ तमे वर्षे १३,५०० रूप्यकाणां निश्चित-वेतन-आधारित-अनुबन्धे नियुक्तम्। पश्चात् तेषां सेवाः नियमितीकृताः, किन्तु अनुबन्ध-कालावधिः वरिष्ठतायां सेवा-लाभे च न योजिता। एतदेव याचिकाकर्तृभिः उच्चन्यायालये प्रत्याह्वानितम् आसीत्।



## राज्य-शिक्षक-पुरस्कारेण ३२ शिक्षकाः सम्मानिताः; 'वन्दे मातरम्' इत्यस्य सर्वेषां छन्दसां (पदानां) ध्वन्या आरम्भः समापनं च

### पुरस्कृत-शिक्षकाणां विवरणम्

एतेषु विद्यालय-शिक्षा-विभागस्य २१, उच्च-शिक्षा-विभागस्य पञ्च (५), प्राविधिक-शिक्षा-विभागस्य च पञ्च (५) शिक्षकाः समाविष्टाः सन्ति। २०२५ वर्षाय चयनितः सोलन-मण्डलस्य शिक्षकः शशिपालः अपि राज्य-शिक्षक-पुरस्कारेण सम्मानितः।

हिमसंस्कृतवार्ता — शिमला। शिक्षक-दिवसस्य अवसरे हिमाचलप्रदेशस्य राजधान्याः शिमलायाः 'लोकभवने' शनिवासरे आयोजितः राज्य-स्तरीय-शिक्षक-सम्मान-समारोहः केवलं पुरस्कार-वितरणस्य कार्यक्रमः नासीत्, अपि तु हिमाचलस्य शिक्षा-व्यवस्थां, तस्याः भविष्यं, 'विकसित-भारतम्-२०४७' इत्यस्य लक्ष्यं चाधिकृत्य व्यापक-विमर्शस्य मञ्चः अपि सञ्जातः।

समारोहस्य आरम्भः समापनं च राष्ट्रगीतस्य 'वन्दे मातरम्' इत्यस्य सर्वेषां छन्दसां विशेष-प्रस्तुत्या सह अभवताम्, येन समग्र-आयोजनाय एका विशिष्टा गरिमा प्रदत्ता। राष्ट्रगीतेन सह राष्ट्रगानस्य धुनम् अपि वादितम्। मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः अन्येषु सर्वकारीय-कार्यक्रमेषु व्यस्ततायाः कारणात् सम्मेलने भागं ग्रहीतुं नाशक्नोत्। शिक्षा-क्षेत्रे सर्वकारस्य प्राथमिकतानाम् उपलब्धीनां च उल्लेखं शिक्षा-मन्त्री रोहितठाकुरः प्राविधिक-शिक्षा-मन्त्री (तकनीकी शिक्षा मन्त्री) राजेशधर्मीणी च अकुरुताम्।

राज्यपालः कविन्द्रगुप्तः विद्यालय-शिक्षा-विभागस्य, उच्च-शिक्षा-विभागस्य, प्राविधिक-शिक्षा-विभागस्य च आहत्य ३२ शिक्षकान् राज्य-शिक्षक-पुरस्कारेण सम्मानितवान्।पुरस्कार-वितरणानन्तरं राज्यपालः अवदत् यत् शिक्षकाः केवलं पाठ्य-पुस्तकानां ज्ञान-प्रदातारः कर्मचारिणः न सन्ति, अपि तु समाजस्य राष्ट्रस्य च भविष्यस्य निर्मातारः भवन्ति।

### राज्य-शिक्षक-पुरस्कारः तेषां बहुवर्षीय-परिश्रमस्य, समर्पणस्य, नवाचारस्य च सम्मानः वर्तते-राज्यपालः

'विकसित-भारतम्-२०४७' इत्यस्य सङ्कल्पनां साकारीकर्तुं शिक्षकाणां भूमिका सर्वाधिकं महत्वपूर्णा वर्तते। देशस्य भविष्यं कस्याञ्चित् संसदि सचिवालये वा न, अपि तु कक्षा-प्रकोष्ठेषु आकारं गृह्णाति।

## नूतन-प्रौद्योगिक्याः युगे शिक्षकाणां महत्त्वम्

राज्यपालः प्रोक्तवान् यत् अद्य यदा शिक्षा तीव्रतया अङ्कीय-तन्त्रज्ञान-आधारिता भवति, तदापि शिक्षकस्य महत्त्वं न न्यूनं जातम्, प्रत्युत पूर्वस्मात् अधिकम् आवश्यकं सञ्जातम्। कृत्रिम-बुद्धिमत्ता (AI), रोबोटिक्स, अङ्कीय-मञ्चाः (Digital Platforms) च शिक्षण-प्रक्रियां सुलभां कर्तुं शक्नुवन्ति, किन्तु शिक्षकस्य मार्गदर्शनं, प्रेरणा, नैतिकता, मानवीयाः संवेदनाश्च कयापि प्रौद्योगिक्या न प्रतिस्थापयितुं शक्यन्ते।सः अवदत् यत् राष्ट्रिय-शिक्षा-नीतिः-२०२० (NEP-2020) शिक्षां केवलं परीक्षा-उपाधि-पर्यन्तं सीमितां न कृत्वा कौशल-विकास-नवाचार-अनुसन्धान-रचनात्मक-चिन्तनैः चरित्र-निर्माणेण च सह संयोजितवती।

राज्यपालः सम्मानितान् शिक्षकान् अभिनन्द्य अवदत् यत् राज्य-शिक्षक-पुरस्कारः तेषां बहुवर्षीय-परिश्रमस्य, समर्पणस्य, नवाचारस्य च सम्मानः वर्तते। तथापि एकस्य गुरोः कृते सर्वोत्कृष्टः पुरस्कारः तदा भवति, यदा तस्य शिष्याः जीवने सफलाः भूत्वा समाजस्य, प्रदेशस्य, देशस्य च निर्माणे योगदानं कुर्वन्ति, स्व-गुरुं च जीवन-पर्यन्तं स्मरन्ति। तेन प्रोक्तं यत् शिक्षकैः केवलं ज्ञानं न, अपि तु संस्काराः, अनुशासनं, सामाजिक-मूल्यानि चापि सञ्चारणीयानि।




## संस्कृतप्रवक्ता डॉ. पद्मनाभः शर्मा शिक्षकदिवसे सरस्वतीविद्यामन्दिर-सरकाघाटे सम्मानितः

**हिमसंस्कृतवार्ताः सरकाघाटम्।**

अमृता-सेवासमित्याः सौजन्येन शनिवासरे सरस्वतीविद्यामन्दिर-सरकाघाटे शिक्षकदिवस-समारोहस्य आयोजनं कृतम्।कार्यक्रमस्य अध्यक्षता पाठशालायाः अध्यक्षया तथा समित्याः अध्यक्षया, राज्यशिक्षकपुरस्कारेण सम्मानितया सोमा राणा इत्यनया कृता। कार्यक्रमे सेवानिवृत्तः प्रधानाचार्यः तथा हिमाचलशिक्षासमित्याः अध्यक्षः, राज्यशिक्षकपुरस्कारेण सम्मानितः सरस्वती नन्दन पराशरः मुख्यातिथिरूपेण उपस्थितः अभवत्। अस्मिन् कार्यक्रमे राज्यशिक्षकपुरस्कारप्राप्ता श्रीमती प्रेम कुमारी अपि उपस्थिताऽऽसीत्।कार्यक्रमे क्षेत्रस्य १३ शिक्षकाः विशेषरूपेण आमन्त्रिताः कृत्वा सम्मानिताः, ये नित्यं पठन-पाठनकार्येण सह अन्यासु पाठ्येतर-गतिविधिष्वपि उत्कृष्टं योगदानं दत्तवन्तः।

शिक्षकदिवसस्य उपलक्ष्ये सम्मानितेषु शिक्षकेषु डॉ. पद्मनाभः शर्मा, राजकीय-वरिष्ठ-माध्यमिक-पाठशाला रिस्सातः संस्कृतप्रवक्ता, तथा नीलम कुमारी, डॉ. विजयकुमारः, सुभाषरावत', डॉ. लता पठानिया, सपना कुमारी, राकेश ठाकुरः, आनन्द पठानिया, डॉ. बलवन्त सिंहः, सुरेश पठानिया, अजय कुमारः, ज्योति प्रकाश तथा पवन कुमारः च सम्मिलिताः आसन्।अस्मिन् अवसरे योगशिक्षकः नेक राम शास्त्री, प्रेम कुमारी ठाकुर, विद्यालयस्य प्रधानाचार्या सपना कुमारी, परमजीत, आँचल, अनीता, रजनी, पूजा, ममता, माया तथा कल्पना इत्यादयः उपस्थिताः आसन्।

# कीरतपुर-मण्डी-चतुष्पथ-राजमार्गे वर्धिष्यते

## गति-सीमा, नितिन-गडकरी-महोदयेन प्रदत्ता स्वीकृतिः,




**हिमसंस्कृतवार्ता — शिमला/नवदेहली।** कीरतपुर-बिलासपुर-मण्डी-राष्ट्रिय-राजमार्गे अथवा चतुष्पथ-मार्गे वाहनानाम् अधिकतम-गति-सीमा प्रति-होरां ६० किलोमीटर-तः ८० किलोमीटर् यावत् वर्धयितुं सहमतिः संजाता। देहलीं गत्वा केन्द्रीय-मन्त्रिणः नितिन-गडकरी-महोदयस्य समक्षम् उप-मुख्यमन्त्रिणा परिवहन-मन्त्रिणा च मुकेश-अग्निहोत्रिणा अयं विषयः उत्थापितः आसीत्, मन्त्रिणा च अस्य कृते स्व-स्वीकृतिः दत्ता। साम्प्रतं केवलं मन्त्रालयात् आधिकारिक-अधिसूचनायाः प्रतीक्षा वर्तते।विधानसभायाः वर्षर्तु-सत्रेऽपि धर्मपुर-क्षेत्रस्य विधायकेन चन्द्रशेखरेण सदने अयं प्रस्तावः उपस्थापितः आसीत्। तदनन्तरं देहलीं गतेन मुकेश-अग्निहोत्रिणा केन्द्रीय-मन्त्रिणे निवेदनं कृतम्। अस्मिन् सन्दर्भे मन्त्रालयस्य अधिकारिभिः विज्ञापितम् आसीत् यत् चतुष्पथ-मार्गे वक्रतानां (Curvatures/मोड़) कारणात् गति-सीमा षष्टिः (६०) किलोमीटर्-मिता निर्धारिता आसीत्। उप-मुख्यमन्त्री मुकेश-अग्निहोत्री नवदेहल्यां केन्द्रीय-मार्ग-परिवहन-राजमार्ग-मन्त्रिणा नितिन-गडकरी-महोदयेन सह तस्य आवासे मिलितवान्। सः अवदत् यत् कीरतपुर-बिलासपुर-मण्डी-मार्गे वाहनानां गति-सीमा ६० तः ८० किलोमीटर् प्रति-होरां यावत् वर्धयितुं सहमतिः संजाता अस्ति।

### चालान-दण्डात् लप्स्यते मुक्तिः

वर्तमान-काले अस्मिन् राष्ट्रिय-राजमार्गे अधिकतम-गति-सीमा ६० किलोमीटर् प्रति-होरा निर्धारिता आसीत्, येन सामान्य-जनैः सहैव व्यावसायिक-वाहन-चालकेषु अपि असन्तोषः व्याप्तः आसीत्। तीव्र-गत्या वाहन-चालनस्य (Over-speeding) प्रकरणेषु महत्यां सङ्ख्यायां चालान-दण्डपत्राणि निर्गम्यन्ते स्म। राजमार्गे विविधेषु स्थानेषु गुप्त-दूरदर्शन-यन्त्राणां (CCTV Cameras) संस्थापनात् वाहनानां स्वचालित-चालान-दण्डः अपि क्रियते स्म, येन वाहन-स्वामिभिः क्लेशः अनुभूयते स्म।
अयं विषयः कतिपयेभ्यः दिनेभ्यः पूर्वं हिमाचलप्रदेश-विधानसभायाम् अपि उत्थापितः आसीत्। मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः विधानसभायाम् इमं विषयं केन्द्रीय-मार्ग-परिवहन-राजमार्ग-मन्त्रिणः समक्षम् उत्थाप्य गति-सीमा-वर्धनस्य वार्तां प्रोक्तवान् आसीत्।



# वैध-अनुज्ञापत्रं योग्यता-प्रमाणपत्रं च विना वाहन-चालनं बीमा-नियमानां मूलभूतम् उल्लङ्घनम् - उच्चन्यायालयः

हिमसंस्कृतवार्ता — शिमला।प्रदेश-उच्चन्यायालयेन मोटर-यान-दुर्घटना-प्रकरणे स्पष्टीकृतं यत् यदि किमपि व्यावसायिक-वाहनं (Commercial Vehicle) वैध-मार्ग-अनुज्ञापत्रं योग्यता-प्रमाणपत्रं (Fitness Certificate) च विना सार्वजनिके मार्गे चाल्यते, तर्हि एतत् बीमा-नीतेः नियमानां मूलभूतम् उल्लङ्घनं मन्स्यते। न्यायालयेन प्रोक्तं यत् एतादृशेषु प्रकरणेषु बीमा-संस्था साक्षात् रूपेण उत्तरदायिनी न स्थास्यति, अपि तु क्षतिपूर्तेः वास्तविकम् उत्तरदायित्वं वाहन-स्वामिनः एव भविष्यति।
न्यायाधीशस्य सुशीलकुकरेजा-महोदयस्य पीठेन 'ओरिएण्टल्-इन्श्योरेन्स्-कम्पनी-लिमिटेड्' संस्थायाः पक्षतः प्रवेशितायां याचिकायां आंशिक-रूपेण स्वीकुर्वता 'भुक्तिं कृत्वा प्रतिप्राप्तिः' (Pay and Recover) इति सिद्धान्तानुसारेण निर्णयः श्रावितः। न्यायालयेन आदिष्टं यत् पीडितानां हिताय बीमा-संस्था पूर्वं क्षतिपूर्ति-राशिं दास्यति, तदनन्तरं नूतनं वादं विना साक्षात् निष्पादन-न्यायालयस्य माध्यमेन वाहन-स्वामिनः समग्र-राशिं ग्रहीतुं शक्ष्यति।

> उच्चन्यायालये श्रवण-काले कुल्लू-क्षेत्रस्य आरटीओ-कार्यालयस्य अभिलेखात् एतत् ज्ञातं यत् दुर्घटनाग्रस्तं 'टाटा सूमो' इति वाहनं व्यावसायिक-रूपेण पञ्जीकृतम् आसीत्।

अस्य वाहनस्य योग्यता-प्रमाणपत्रं ६ जुलाई २००५ दिनाङ्के एव समाप्तम् अभवत् तथा च मार्ग-अनुज्ञापत्रम् अपि ७ अगस्त २००८ पर्यन्तमेव वैधम् आसीत्। तथापि २०१३ तमे वर्षे विना कैश्चित् प्रपत्रैः इदं वाहनं मार्गेषु चाल्यते स्म। न्यायालयेन स्पष्टीकृतं यत् कोऽपि स्वामी यात्रिणां, पादचारिणां, सामान्य-जनतायाश्च जीवनं सङ्कटे पातयित्वा एतादृशानां वाहनानां सञ्चालनस्य अनुमतिं दातुं न शक्नोति।

# बिहारस्य राजधानी पटनानगरे भव्यरूपेण

## जन्माष्टमीमहोत्सवस्य आयोजनम्

**हिमसंस्कृतवार्ताः- डॉ विमलेश झा,** पाटलिपुत्रम् बिहारस्य राजधानी पटनानगरे श्रीकृष्णजन्माष्टमीमहोत्सवः अत्यन्तं हर्षोल्लासेन भक्तिभावेन च आचरितः। पटनास्थिते इस्कॉनमन्दिरे मुख्यपूजायाः शुभारम्भः रात्रौ ११ वादने अभवत्। अस्मिन् अवसरे १०८ रजतकलशैः भगवान् श्रीकृष्णस्य अभिषेकः सम्पन्नः अभवत्। सायंकालादेव इस्कॉनमन्दिरे भक्तानां विशालः जनसमूहः समागतः। मन्दिरात् बहिः प्रायः एककिलोमीटर्पर्यन्तं भक्तानां पङ्क्तिः दृश्यते स्म। महिलाभ्यः पुरुषेभ्यश्च पृथक्-पृथक् पङ्क्तीनां व्यवस्था कृता आसीत्। अभिषेकात् पूर्वमेव पञ्चसहस्राधिकाः श्रद्धालवः मन्दिरात् बहिः उपस्थिताः आसन्। अस्मिन् पावने पर्वणि पटनानगरस्य मिलरविद्यालयप्राङ्गणे अपि कृष्णमहोत्सवस्य भव्यम् आयोजनम् अभवत्। महोत्सवे भोजपुरी-अभिनेत्री अक्षरासिंह, प्रसिद्धः गायकः बी. प्राक भक्तिगीतानि प्रस्तुतवन्तौ। बी. प्राकमहोदयेन बहूनि लोकप्रियाणि भक्तिगीतानि प्रस्तुतानि, येन उपस्थिताः श्रद्धालवः भक्तिरताः अभवन्। भक्ताः भक्तिगीतानां श्रवणेन नृत्येन च आनन्दमग्नाः अभवन्।
महोत्सवस्य पूर्वं स्वास्थ्यमन्त्री निशान्तकुमारः इस्कॉनमन्दिरे शङ्खेन श्रीराधाकृष्णयोः अभिषेकं कृतवान्। तदनन्तरं राज्यपालः (सेवानिवृत्तः) लेफ्टिनेन्ट जनरल सैयद अता हसनैनमहाशयः अपि इस्कॉनमन्दिरं गत्वा भगवतः श्रीकृष्णस्य आरात्रिकं कृतवान् तथा बालकृष्णस्य दोलायां झूलनं कृतवान्। तथैव मुख्यमन्त्री सम्राट चौधरी पूजामर्चनां कृत्वा भगवतः श्रीकृष्णस्य आरात्रिकं सम्पादितवान्। पूर्वमुख्यमन्त्री नीतीशकुमारः अपि इस्कॉनमन्दिरं गत्वा पूजामर्चनां कृतवान्।
समग्रे बिहारप्रदेशे जन्माष्टमीपर्वणि मन्दिरेषु विशेषपूजा, अभिषेकः, आरात्रिकं, भजन-कीर्तनानि च आयोजितानि। भक्ताः भगवतः श्रीकृष्णस्य जन्मोत्सवं श्रद्धया भक्त्या च समाचरन्तः सुख-शान्ति-समृद्धेः कामनां कृतवन्तः।






# शिक्षकः समाजस्य राष्ट्रस्य च भविष्यस्य निर्माता अस्ति आचार्यः ललितकुमार अवस्थी

**हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा**

शिक्षकदिवसस्य पावनावसरे सरदारपटेल-विश्वविद्यालय मण्डी इत्यस्य इतिहासविभागस्य इतिहाससमित्या शिक्षाक्षेत्रे स्वजीवनं समर्पितवतां वरिष्ठशिक्षाविदाम् सम्माने एकः विशेषकार्यक्रमः आयोजितः। कार्यक्रमे विश्वविद्यालयस्य माननीयः कुलपतिः आचार्यः ललितकुमार अवस्थी मुख्यातिथिरूपेण आभासीयमाध्यमेन योजितः, सः च शिक्षकसमुदायाय शिक्षकदिवसस्य हार्दिक्यः शुभकामनाः दत्तवान्।स्वसन्देशे कुलपतिः आचार्यः ललितकुमार अवस्थी अवदत् यत् शिक्षकः समाजस्य चरित्रस्य संस्कृतेः राष्ट्रस्य भविष्यस्य च निर्माता भवति। शिक्षकस्य प्रभावः कक्षायाः भित्तिभ्यः अग्रे अपि गच्छति, तस्य शिक्षा संस्काराः च आगामिपीढीनां जीवनाय दिशाम् यच्छन्ति। सः अवदत् यत् आजीवनं शिक्षाक्षेत्रे समर्पितवतां वरिष्ठशिक्षकानां सम्मानम् अस्माकं गौरवशालिन्याः गुरु- शिष्यपरम्परायाः प्रति सम्मान प्रकटीकरणम् अस्ति।अद्यतनस्य परिवर्तमाने तकनीकी- वैश्विकपरिवेशे च शिक्षकस्य भूमिका अतीव महत्त्वपूर्णा जाता अस्ति। अस्माभिः ज्ञानेन सह मूल्यानि नवाचारः शोधः मानवीय संवेदनाः च शिक्षायाः आधारः करणीयाः। शिक्षकदिवसस्य अवसरे वयं सङ्कल्पं कुर्याम यत् शिक्षां केवलं रोजगारस्य माध्यमं न अपि तु राष्ट्र निर्माणस्य सामाजिकपरिवर्तनस्य विकसितभारतनिर्माणस्य च प्रभावी साधनं विधास्यामः। कार्यक्रमस्य विशेष आकर्षणं विश्वविद्यालयस्य कुलपति कार्यालये आयोजितः अभिनन्दनसमारोहः आसीत्। अस्मिन् अवसरे कुलपतिना आचार्यः ललितकुमार अवस्थी महोदयेन शिक्षाक्षेत्रे दीर्घ समर्पित; अनुकरणीयसेवाभ्यः भूपेन्द्रपाल मल्होत्रावर्यः महोदयाय अभिनन्दन पत्रं प्रदत्तं यदा तु जयाशर्मा इत्यस्यै अभिनन्दनपत्रं तस्याः पुत्रेण अनिलशर्मणा प्राप्तम्। आचार्यः ललितकुमार अवस्थी सूचितवान् यत् तस्य प्रतिनिधिरूपेण डॉ. राकेशकुमारशर्मा, इतिहासविभागस्य प्राध्यापकाः जयाशर्मा महोदयायै तस्याः निवासस्थाने अभिनन्दन पत्रं प्रदास्यन्ति।

## पञ्च दशकात् अधिकस्य शिक्षकीय साधनायाः सम्मानम्

भूपेन्द्रपाल मल्होत्रा महोदयस्य जन्म अष्टादश अप्रैल एकोनविंशति शततमे वर्षे मण्डीनगरे अभवत्। सः एकादश मई त्रिपञ्चाशदधिक एकोनविंशतिशततमे वर्षे शिक्षकरूपेण स्वसेवाकालस्य शुभारम्भं कृतवान्। प्रायः पञ्चदशकान् यावत् शिक्षा- समाजसेवाक्षेत्रे योगदानं दत्त्वा सः अष्टाशीत्यधिक एकोनविंशति शततमे वर्षे केन्द्रप्रमुखशिक्षकपदात् सेवानिवृत्तः जातः। शिक्षां प्रति तस्य प्रतिबद्धता सेवानिवृत्तेः अनन्तरम् अपि निरन्तरा आसीत्। नवासीत्यधिक-एकोनविंशतिशततमे वर्षे सः आर्यसमाजविद्यालयः मण्डी इत्यत्र पुनः शिक्षकरूपेण सेवाः प्रदत्तवान्। स्वदीर्घ- अनुभव- अनुशासन- नेतृत्वक्षमतायाः आधारेण सः प्रधानाचार्यरूपेण अपि महत्त्वपूर्णं दायित्वं निर्वहितवान्, एकाधिकद्विसहस्रतमे वर्षे अस्मात् पदात् सेवानिवृत्तः जातः। तस्य शिक्षकीय जीवनं केवलं ज्ञान प्रसारं यावत् सीमितं नासीत् अपि तु सः अनेक पीढीनां विद्यार्थिषु अनुशासन संस्कार कर्तव्यबोध सामाजिक उत्तरदायित्व भावनानां विकासे महत्त्वपूर्णां भूमिकां निर्वहितवान्।

## शिक्षकदिवसे सरदारपटेल विश्वविद्यालयस्य इतिहास-विभागेन वरिष्ठशिक्षाविदः अभिनन्दनपत्रं प्रदाय सम्मानिताः।

## ज्ञानात् संस्कारं यावत् शिक्षकदिवसे एसपीयू इत्यनेन वरिष्ठशिक्षकाणां कृतम् अभिनन्दनम्

## जयाशर्मा इत्यस्याः शिक्षणक्षेत्रे उल्लेखनीयं योगदानम्

अस्मिन् एव क्रमे आदरणीयायै जयाशर्मा महोदयायै अपि शिक्षाक्षेत्रे तस्याः दीर्घसमर्पित-योगदानाय अभिनन्दनपत्रं प्रदत्तम्। जयाशर्मा महोदयायाः जन्म प्रथम जून सप्तत्रिंशदधिक-एकोनविंशति शततमे वर्षे अभवत्। सा मण्डीजनपदस्य विभिन्नविद्यालयेषु अध्यापनकार्यं कुर्वती विद्यार्थिनां ज्ञान- व्यक्तित्व- संस्कारनिर्माणे उल्लेखनीयं योगदानं दत्तवती। सा केन्द्रीय-मुख्य- अध्यापकरूपेण अपि महत्त्वपूर्णं दायित्वं निर्वहितवती, राजकीय- प्राथमिक- पाठशाला पुरानी मण्डी इत्यस्मात् एकत्रिंशत् मई पञ्चनवतीत्यधिक- एकोनविंशतिशततमे वर्षे सेवानिवृत्ता जाता। प्रायः चत्वारि दशकान् यावत् तस्याः शिक्षकीयजीवनम् अनेकविद्यार्थिनां जीवनाय दिशाम् अददात्।

## वरिष्ठशिक्षकानाम् अनुभवः शिक्षाजगतः अमूल्या धरोहरः

इतिहासविभागस्य विभागाध्यक्षः डॉ. राकेशकुमार शर्मा अवदत् यत् वरिष्ठशिक्षकानां जीवनम् अनुभवः च समाजस्य शिक्षाजगतः च अमूल्या धरोहरः अस्ति। एतैः शिक्षाविद्भिः स्वज्ञान-अनुभव- अनुशासन- कर्तव्यनिष्ठा- मानवीय मूल्यानां माध्यमेन विद्यार्थिनः न केवलं शिक्षिताः अपि तु तान् उत्तरदायिनः संस्कारितान् जागरूक नागरिकान् निर्मातुं कार्यं कृतम्। सः अवदत् यत् शिक्षक दिवसे एतादृशानां शिक्षकानाम् अभिनन्दनं विश्वविद्यालयस्य कृते गर्वस्य विषयः अस्ति। इदं सम्मानं नूतनपीढ्याः शिक्षकेभ्यः विद्यार्थिभ्यः च समर्पण सेवा उत्कृष्टतायाः प्रेरणाम् प्रदास्यति। कार्यक्रमे इतिहासविभागस्य विभागाध्यक्षः डॉ. राकेशकुमार शर्मा छात्र-कल्याण- अधिष्ठाता आचार्यः राजेशकुमारशर्मा, अकादमिकप्रकरण- अधिष्ठाता डॉ. पवनचन्दः, योजना- विकास- अधिष्ठाता डॉ. लखवीर सिंहः, लोकप्रशासन- विभागाध्यक्षः डॉ. रामपालः, सहायक- आचार्यः डॉ. जगदीपवर्मा, विकेशकुमारः, राजेशशर्मा, कृष्णचन्दः इतिहाससमितेः अध्यक्षा मनीषा उपाध्यक्षः लखविन्दरसिंहः इत्येतैः सह इतिहाससमितेः पदाधिकारिणः उपस्थिताः आसन्। अन्ते सम्मानितानां शिक्षाविदाम् प्रति श्रद्धासम्मानं कृतज्ञतां च प्रकटयन् तेषाम् उत्तमस्वास्थ्य सुखशान्तिदीर्घायुष्याः मङ्गलकामना कृता।




# राष्ट्रपतिः द्रौपदी मुर्मुः प्रो. शिवानी वी. इत्येतां राष्ट्रिय-शिक्षक-पुरस्कारेण–२०२६ सम्मानितवती

## संस्कृतविषयतः राष्ट्रियसम्मानं प्राप्तवती एकमात्रा शिक्षाविद्, पाणिनीयज्ञानं प्रौद्योगिक्या सह सम्बद्धम्

हिमसंस्कृतवार्ताः - नवदेहली। संस्कृतशिक्षायाः, अनुसन्धानस्य तथा प्रौद्योगिकी-नवाचारस्य क्षेत्रेषु उल्लेखनीययोगदानं ददती कर्नाटक-संस्कृत-विश्वविद्यालयस्य, बेङ्गलूरुनगरस्य प्रो. शिवानी वी. इति प्रतिष्ठितेन राष्ट्रिय-शिक्षक-पुरस्कारेण–२०२६ सम्मानिता। शिक्षकदिवसस्य अवसरे राष्ट्रपतिना द्रौपदी मुर्मु इत्यनया नवदेहलीस्थे विज्ञानभवने आयोजिते समारोहे तस्यै अयं राष्ट्रियसम्मानः प्रदत्तः।अस्मिन् अवसरे केन्द्रीय-शिक्षामन्त्री प्रह्लाद जोशी, शिक्षा-कौशलविकास-उद्यमिताराज्यमन्त्री जयन्त चौधरी, शिक्षाराज्यमन्त्री सुकान्त मजूमदारः इत्यादयः अनेकाः गणमान्याः व्यक्तयः उपस्थिताः आसन्। पुरस्कारस्वरूपं प्रो. शिवानी वी. इत्यस्यै प्रशस्तिपत्रं तथा रजतपदकं प्रदत्तम्।उच्चशिक्षासंस्थानानां तथा पॉलिटेक्निक्-श्रेण्याः कृते देशस्य सर्वेभ्यः चयनितेषु शिक्षकेषु प्रो. शिवानी वी. संस्कृतविषयतः सम्मानं प्राप्तवती एकमात्रा शिक्षाविद् अस्ति। तस्याः चयनम् उत्कृष्ट-अध्यापनस्य, अनुसन्धानस्य, नवाचारस्य, शैक्षणिक-नेतृत्वस्य तथा समाजोपयोगि-कार्येषु विशिष्टयोगदानस्य कृते कृतम् अस्ति।

## पाणिनीयज्ञानपरम्परां आधुनिकप्रौद्योगिक्या सह संयोजितवती

संस्कृतव्याकरणस्य विशेषज्ञा प्रो. शिवानी वी. इत्यनया पाणिनीयज्ञानपरम्परां आधुनिकप्रौद्योगिक्या सह संयोजितुं दिशि उल्लेखनीयं कार्यं कृतम् अस्ति। साङ्गणिक-भाषाविज्ञानम् (Computational Linguistics), प्राकृतिक-भाषा-संसाधनम् (Natural Language Processing) तथा कृत्रिमबुद्धिमत्ता (Artificial Intelligence) इत्येतेषां क्षेत्रेषु संस्कृतस्य सम्भावनानां विषये तस्याः कार्यं विशेषरूपेण चर्चितम् अस्ति।

वर्तमानकाले शास्त्रसंकायस्य अधिष्ठाता तथा व्याकरणविभागस्य विभागाध्यक्षा इति दायित्वे कार्यरतया प्रो. शिवान्या आई.आई.टी. तथा आई.आई.एम्. इत्यादिभिः प्रतिष्ठितसंस्थाभिः सह अन्तर्विषयक-शैक्षणिक-परियोजनानाम् अपि गतिः वर्धिता।

संभाषा इत्यस्य माध्यमेन तस्याः मार्गदर्शने विकसिताः महाकोशः, आयुःसंस्कृतम् तथा साङ्गणिकपाली इत्यादयः डिजिटल-परियोजनाः भारतीयज्ञानपरम्परां नूतनसन्ततिं प्रति प्रापयितुं कार्यं कुर्वन्ति।राष्ट्रपतिपुरस्कारेण सम्मानिते सति केन्द्रीय-संस्कृत-विश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवास वरखेडी, कुलसचिवः प्रो. आर. जी. मुरलीकृष्णः, प्रो. मधुकेश्वर भट्टः इत्यादिभिः संस्कृतानुरागिभिश्च तस्यै अभिनन्दनानि शुभकामनाश्च प्रदत्ताः।



# प्रो. पराग जोशी 'डॉ. जे. पी. नाईक-आदर्श-राज्यशिक्षक' पुरस्कारेण सम्मानितः

हिमसंस्कृतवार्ताः - नागपुरम्।महाराष्ट्र-सर्वकारस्य डॉ. जे. पी. नाईक आदर्शशिक्षक-राज्यपुरस्कारस्य अन्तर्गतं वर्षे २०२४–२५ कृते कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयस्य युवा-विद्वान्, कविः तथा संस्कृतभाषा-साहित्य-विभागस्य प्रमुखः प्रो. परागजोशी महाराष्ट्र-राज्यस्य उच्च-तकनीकी-शिक्षामन्त्रिणः माननीयस्य श्री चन्द्रकान्तदादा पाटीलस्य करकमलाभ्यां सम्मानितः। शिक्षाक्षेत्रे तस्य विशिष्टयोगदानाय तस्मै अयं प्रतिष्ठितः पुरस्कारः प्रदत्तः।

अस्मिन् समारोहे उच्च-तकनीकी-शिक्षा-सञ्चालनालयस्य सञ्चालकः डॉ. शैलेश देवळाणकरः, अन्ये अधिकारिणः तथा पुणे-विश्वविद्यालयस्य माननीयः कुलपतिः डॉ. सुरेश गोसावी इत्यादयः अन्ये मान्यवराः विशेषरूपेण उपस्थिताः आसन्।

## माननीय-कुलपतेः डॉ. अतुल वैद्यस्य पक्षतः अभिनन्दनम्!

प्रो. पराग जोशी-महोदयस्य आदर्शशिक्षक-राज्यपुरस्कारेण सम्मानितं भवितुं विश्वविद्यालयाय गौरवस्य विषयः अस्ति—इति प्रतिक्रिया माननीयेन कुलपतिना डॉ. अतुल वैद्येन व्यक्ता। तेन प्रो. जोशी-महोदयाय भविष्येऽपि एवं प्रकारेण अनेकाः गौरवाः प्राप्नुयुः इति शुभकामनाः आशीर्वादश्च प्रदत्तौ।

प्रो. पराग जोशी-महोदयेन अयं पुरस्कारः प्राप्ते सति विश्वविद्यालयस्य कुलसचिवः डॉ. रोशन अलोने, संस्कृत-संस्कृतेतर-संकाययोः अधिष्ठाता प्रो. कविता होले तथा अन्ये सर्वे अधिष्ठातारः, संवैधानिकाः अधिकारिणः एवं सदस्याः तस्य अभिनन्दनं कृतवन्तः।

प्रो. पराग जोशी युवा-विद्यार्थिषु च लोकप्रियः प्राध्यापकः अस्ति तथा संस्कृतकविरूपेण तस्य विशेषा ख्यातिः अस्ति। विभिन्नासु भाषासु प्रवीणतया सह काव्ये, शास्त्रे, वक्तृत्वे, लेखने, वाक्यार्थे, अध्यापने तथा प्रशासने इत्यादिषु विविधक्षेत्रेषु तेन स्वकीयां विशिष्टां परिचितिं निर्मिता। तेन शास्त्रविद्यागुरुकुलम् इत्यस्य सञ्चालकरूपेण अपि कार्यं कृतम् अस्ति। सः माननीयस्य कुलपतेः विशेषकार्यकारी-अधिकारीरूपेण अपि स्वसेवाः प्रददाति।

प्रो. जोशी-महोदयेन संस्कृत-साहित्यशास्त्रेण सह दर्शनशास्त्रस्य, व्याकरणस्य, मनोविज्ञानस्य, आधुनिकसाहित्यस्य एवं काव्यस्य विशेषमध्ययनं कृतम् अस्ति। वर्तमानकाले सः विश्वविद्यालयस्य नैक् (NAAC) समन्वयकरूपेण कार्यरतः अस्ति। एकस्मिन् एव समये विविधदायित्वानां कुशलतापूर्वकं निर्वहणं कुर्वन् तेन शिक्षा, अनुसन्धान तथा प्रशासनम्—एतेषु त्रिषु क्षेत्रेषु स्वकीयां विशिष्टा ख्याति स्थापिता अस्ति।तेन समग्र-कालिदास-वाङ्मयस्य अनुवाद-प्रकल्पस्य कार्यकारीसम्पादकरूपेण तथा समग्र-भासनाटकचक्रस्य सम्पादकरूपेण द्वे महत्त्वपूर्णे अनुवाद-सम्पादन-परियोजने पूर्णे कृते स्तः।

# संस्कृतमहोत्सवे विद्यार्थिजनानां प्रतिभाप्रदर्शनम्

## रत्नागिरी-संस्कृतोपकेन्द्रस्य पक्षतः आयोज्यमानां विविधस्पर्धानां उत्स्फूर्तः प्रतिसादः






**हिमसंस्कृतवार्ताः -रत्नागिरी।**
संस्कृतभाषायाः प्रचार-प्रसारस्य, विद्यार्थिषु संस्कृतभाषाविषये रुचेः, ज्ञानस्य तथा कलागुणानां च विकासस्य उद्देशेन कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयस्य, रामटेक इत्यस्य विस्तारसेवामण्डलेन तथा भारतरत्न-डॉ. पाण्डुरङ्ग-वामन-काणे-संस्कृत-अध्ययनकेन्द्रस्य, रत्नागिरी-उपकेन्द्रेण संस्कृतमहोत्सवस्य निमित्तेन विविधाः स्पर्धाः आयोजिताः। एताः सर्वाः स्पर्धाः २ सप्टेम्बर २०२६ इति दिनाङ्के मध्याह्ने २ वादनतः सायं ६ वादनपर्यन्तं रत्नागिरी-संस्कृतोपकेन्द्रस्य परिसरे सम्पन्नाः।अस्मिन् उपक्रमे संस्कृतसाहित्य-सामान्यज्ञानाधारित-प्रश्नमञ्जूषा-स्पर्धा, भगवद्गीतायाः पञ्चदशाध्यायस्य मुखोद्गत-पाठ-स्पर्धा, संस्कृतगीतगायन-स्पर्धा तथा महागणेशपञ्चरत्नस्तोत्र-पठन-स्पर्धा इत्येताः चतस्रः स्पर्धाः आयोजिताः। सर्वाः स्पर्धाः शालेयगणः (कक्षा ५ तः ९ पर्यन्तम्) तथा खुलागणः इति द्वयोः गणयोः आयोजिताः।स्तोत्रपठन-स्पर्धायाः निर्णायकौ वैशाली दळी तथा ओंकार खांडेकर इत्येतौ आस्ताम्। संस्कृतगीतगायन-स्पर्धायाः निर्णायकत्वं पूर्णिमा साठे तथा स्वरदा लोवलेकर इत्याभ्यां कृतम्। गीतापाठ-स्पर्धायाः शालेयगणस्य निर्णायकत्वम् अक्षया भागवत तथा मेधा घाणेकर इत्याभ्यां, खुलागणस्य च मीरा नाटेकर तथा प्रीती टिकेकर इत्याभ्यां कृतम्। प्रश्नमञ्जूषा-स्पर्धायाः निर्णायकत्वं रत्नागिरी-संस्कृतोपकेन्द्रस्य सञ्चालकेन डॉ. दिनकर मराठे इत्यनेन कृतम्।

### स्पर्धानां परिणामाः

१. महागणेशपञ्चरत्नस्तोत्र-पठन-स्पर्धा
शालेयगटः—
प्रथमः — नचिकेत अमोल बाम
द्वितीयः — नमिता भरत सागवेकर
तृतीयः — ज्ञानदा योगेश नातू
उत्तेजनार्थम् — गार्गी मंदार देवल, आदिती जयदीप गद्रे, सिद्धांत दिनकर मराठे।
खुलागटः —
प्रथमः — चिन्मयी उमाकांत सरपोतदार
द्वितीयः — भाविक भूषण कांबळी
तृतीयः — स्वरा चंदन गवाणकर
उत्तेजनार्थम् — पूर्वा विनायक जोशी।

२. संस्कृतगीतगायन-स्पर्धा
शालेयगटः —
प्रथमः — ओवी प्रथमेष आंबेकर
द्वितीयः — आदिती जयदीप गद्रे
तृतीयः — सिद्धांत दिनकर मराठे
उत्तेजनार्थम् — मनस्वी सुनील कबीर, ईरा अजय बोरवणकर।
खुलागटः —
प्रथमः — अनघा प्रभाकर जोगळेकर
द्वितीयः — नयन केशव आंबेकर, चिन्मयी उमाकांत सरपोतदार
तृतीयः — गंधार नाईक
विशेषपुरस्कारः — स्वरा केदार लिंगायत, रिद्धि अजय लिंगायत, सिद्धि अजय लिंगायत, साक्षी सुनील धोंडगा, ईशा राकेश भोई, अमृता नवाथे।

### अस्यां स्पर्धायाम् आहत्य ३५ स्पर्धकाः सहभागिनः अभवन्

सर्वासु स्पर्धासु रत्नागिरी-चिपळूण-नगरयोः विद्यालयेभ्यः तथा महाविद्यालयीय-विद्यार्थिनः, रत्नागिरी-नगरवासिनः च इति प्रायः १५० जनाः सहभागी अभवन्। विविधस्पर्धानां आयोजनेन विद्यार्थिभ्यः प्रतिभाप्रदर्शनाय उत्कृष्टं व्यासपीठं प्राप्तम्। अनेन संस्कृतभाषायाः अध्ययने, स्तोत्रादीनां पठने-गायने च विद्यार्थिषु अधिका रुचिः उत्पन्ना इति आयोजकैः प्रतिपादितम्। अस्मिन् प्रसङ्गे रत्नागिरी-संस्कृतोपकेन्द्रस्य सञ्चालकः डॉ. दिनकर मराठे, प्रा. कश्मीरा दळी, प्रा. अविनाश चव्हाण, प्रा. रिया बिष्ट, प्रकल्प-सहायिके सई ओक तथा जान्हवी पाध्ये, कक्षाधिकारी प्रथमेश घोसाळे, कार्यालयसहाय्यकः करण कीर, लिपिकाः अपर्णा कोकरे तथा कल्पजा जोगळेकर, सुरक्षारक्षकः रोहित घोसाळे, समन्वयकः स्वरूप काणे तथा विविधस्पर्धानां स्पर्धकाः एवं स्थानीयाः रत्नागिरी-नगरवासिनः उपस्थिताः आसन्।

### भगवद्गीतायाः पञ्चदशाध्यायस्य पाठान्तर-स्पर्धा

शालेयगटः —
प्रथमः — शुभ्रा शैलेश केतकर
द्वितीयः — रिया उदय काजरेकर, गार्गी मंदार देवल
तृतीयः — गार्गी माधव काणे, सारा समीर महाजन।
खुलागटः —
प्रथमः — अनघा प्रभाकर जोगळेकर
द्वितीयः — सुरेखा मुकुंद जोशी
तृतीयः — श्रुती विजय बोरवणकर
उत्तेजनार्थम् — रुद्रांश उमेश लोवलेकर।

**४. प्रश्नमञ्जूषा-स्पर्धा**
प्रश्नमञ्जूषा-स्पर्धायां व्याडेश्वरः, मार्लेश्वरः, तृणबिंदुकेश्वरः, हरिहरेश्वरः तथा विश्वेश्वरः इति पञ्च गटाः निर्मिताः आसन्। तेषु—
प्रथमः — मार्लेश्वरगटः
द्वितीयः — हरिहरेश्वरगटः
तृतीयः — विश्वेश्वरगटः।

# हास्यकणिका

### अध्यापकः छात्रः च

**अध्यापकः (क्रोधेन)** – "भो छात्र! त्वं प्रतिदिनं विलम्बेन किमर्थं विद्यालयम् आगच्छसि?"
**छात्रः (सरलभावेन)** – "आचार्य! मार्गे एकः फलकः (Signboard) अस्ति, यस्मिन् लिखितम् अस्ति— 'अग्रे विद्यालयः अस्ति, शनैः शनैः चलतु!' अहं तु केवलं तस्य निर्देशस्य पालनं करोमि!"




### चिकित्सकः रोगी च

**चिकित्सकः** – "अहम् औषधं लिखामि। एतत् औषधं प्रतिदिनं प्रातः धावनानन्तरं स्वीकरोतु।"
**रोगी** – "श्रीमन्! तत् तु उचितम्, किन्तु धावनं कुत्र करणीयम्— गृहस्य अन्तः अथवा बहिः?"
**चिकित्सकः (आश्चर्येन)** – "यत्र इच्छति तत्र धावतु, एतस्मिन् कः भेदः?"
**रोगी** – "भेदः अस्ति महोदय! यदि अहम् अन्तः धावामि तर्हि पत्नी ताडयिष्यति, यदि बहिः धावामि तर्हि कुक्कुराः (श्वानाः) धावयिष्यन्ति!"






डॉ नवीन ममगाईं उत्तराखण्ड पौडी गढवाल


# संस्कृतविद्यालये भुवनेश्वर्यां शिक्षकदिवसस्य भव्यसमारोहः

कोट-विकासखण्डान्तर्गते ब्रिगेडियर-विद्याधर-जुयाल-संस्कृत-विद्यालये शिक्षकदिवसस्य पुण्यलग्ने गरिमामय समारोहः सञ्चालितः। अस्मिन् समारोहे छात्रैः स्वकीयगुरुजनानाम् प्रति अनन्ता श्रद्धा, कृतज्ञता, महनीयः सम्मानश्च प्रकटीकृतः, तथा च सनातन-गुरु-शिष्य-परम्परायाः गौरवमयी महत्ता समुद्घाटिताकार्यक्रमस्य प्राक्कथनं भगवत्याः सरस्वत्याः अर्चनवन्दनाभ्यां निर्व्यूढम्। छात्रैः वेदोक्तानां श्लोकानाम्, सुमधुराणां गीतानां, ओजस्विनां भाषणानां, सांस्कृतिकप्रस्तुतीनाञ्च माध्यमेन अध्यापकानां प्रति स्वकीयाः भावतरङ्गाः अभिव्यक्ताः। छात्रैः समुपस्थितासु प्रस्तुतिषु भारतीयसंस्कृतेः, शाश्वतसंस्काराणां, गुरोः चरणयोः निष्ठायाश्च रमणीयं दर्शनं प्राप्यत।

अस्मिन् प्रसङ्गे छात्रैः उद्घोषितं यत् शिक्षकाः केवलं पाठ्यपुस्तकीयज्ञानस्य सीमाबद्धाः न भवन्ति, अपितु ते प्रज्ञायाः, सदाचाराणां, अनुशासनस्य, जीवनादर्शकृतानाञ्च मूल्यानां प्रदातारः प्राणभूताः प्रेरणास्रोताः सन्ति। प्राचीनगुरुकुल-परम्परायाः अनुगामिनि विद्यालयास्य वातारणे शिक्षकदिवसस्य अयम् उत्सवः अतीव भावुकः प्रभावोत्पादकश्च आसीत्। विद्यालये अध्ययनरतैः छात्रैः स्वगुरुजनान् पुष्पहारैः शुभाशीर्वाजैश्च समाराध्य तेषां अनुग्रहो लब्धः। विद्यालयस्य प्रबन्धकेन राजेन्द्रजुयालेन अध्यापकेभ्यः छात्रेभ्यश्च मंगलकामनाः प्रेषिताः। श्रेष्ठपरिश्रमाय सर्वातिशयफलापलब्धये च सर्वेभ्यः विद्यालयस्य प्रधानाचार्यः अनसूयाप्रसाद-सुन्दरियालः, छात्रावासस्य मुख्यप्रशासकः नवीनजुयालश्च छात्रान् जीवनेऽस्मिन् अनवरतपरिश्रमाय, अनुशासनस्य, विनीतस्वभावस्य, संस्कृतीनाञ्च अनुपालनाय बोधितवन्तौ। ताभ्याम् स्पष्टीकृतं यत् यूयं सर्वे अस्माकं समूहेन विगतवर्षेभ्यः छात्रावासान्तर्गतम् एव निवसन्तः दिवानिशं यत् श्रमं कुर्मः, तस्य समुचितं फलं प्राप्नुत। डॉ. नवीन ममगाईं उद्बोधनावसरे गुरु-शिष्य-परम्परायाः गाम्भीर्यम् अधिकृत्य स्वविचाराः प्रस्तुताः। तेनोदाहृतं यत् भारतीयसंस्कृतौ गुरोः पदवी सर्वोपरि वर्तते। गुरुः एव मानवम् अतमसो ज्योतिर्ग्रामं प्रापयति, असत्यात् सत्याधिगमाय प्रेरयति, निराशायाः च संशयाच्च निष्कृष्य आत्मबलस्य मार्गे प्रस्थापयति।

विद्यालयस्य समस्तैः प्राध्यापकैः उद्घोषितं यत् भुवनेश्वरीसंस्कृतविद्यालयस्य परमं ध्येयं छात्रेभ्यः पारम्परिकसंस्कृतशिक्षया सहार्वाचीनं ज्ञानं, भारतीयसंस्कृतेः मूलाधारान्, संस्कारान्, अनुशासनञ्च दात्वा तेषां सर्वाङ्गिणम् अभिवृद्धिकरणम् अस्ति। वयम् एतद् लक्ष्मधिगम्य सततं प्रयतमानाः स्मः। समारोहस्य उपसंहारे विद्यालयपरिवारेण सर्वेभ्यः गुरुभ्यः शिक्षकदिवसस्य अन्याः शुभाशयाः प्रदत्ताः, छात्रैः च स्वगुरुजनानाम् प्रति आजीवनं सम्मानस्य कृतज्ञतायाश्च दृढः संकल्पः अनुष्ठितः।अस्मिन् पर्वावसरे डॉ. अनूपकुकरेती, ईशानडोभालः, कमलदीपपोखरियालः, आशीषडबरालः, नीरजपटवालः, अंकितमैठाणी, मयंकसुन्दरियालः, रामेश्वरजोशी, वैष्णवी प्रभृतयः सर्वेऽपि गुरवः छात्राश्च सविनयमुपस्थिताः आसन्।

## "संस्कृत कथा मञ्जरी" {१४}
## ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।
# "अथ सरःपूरणं नाम अष्टमोपाख्यानम्"




अथ तथैव सिंहासनसमीपस्थः कौतुकरसरभसवशंवदो धरित्रीपतिः पुत्तलिकयैकया समभिदधे- श्रृणुं राजन्! विक्रमो राजा भूमण्डले प्रसिद्धः नानाविनोदाश्चर्य्यपूर्णः तथा परकौतुकादिकं चारमुखेण जानाति।

श्रूयतां राजन्- यो राजा भवति, तेन सर्वाऽपि लोकसंस्थितिः ज्ञातव्या, सर्वस्प चित्तं बोद्धव्यं प्रजाः सम्यक् पालनीयाः, दुष्टाः दण्डनीयाः, न्यायेन धनोपार्ज्जनं कर्तव्यम्, अर्थिषु समत्वं विधेयम् तान्येव राज्ञः पञ्चमहायज्ञकर्माणि। एवमेव विक्रमे राज्यं कुर्वति सति, एकदा चाराः भूमण्डलं परिभ्रम्य राजसकाशमागताः, राज्ञा पृष्टाः प्रोचुः- भो देव! काश्मीरदेशे महाद्रव्यसम्पन्नः कश्चिद्वणिगास्ते। तेन वणिजा पञ्चक्रोशविस्तारं तडागमेकं खानितम्; तन्मध्ये नवनिर्मित दिव्यप्रासादे जलशयनस्य लक्ष्मीनारायणस्य शयनं कारितं, परमुदकं न लगति | पुनः तेन वणिजा जलोद्गमनिमित्तं चक्रिणम् उद्दिश्य ब्राह्मणैर्जपपूजाहवनमभिषेकादि च कारितं, तथाप्युदकं न समुद्गतम्। ततोऽतिखिन्नः सन् स वणिक् तडागपाल्युपरि उपविश्य प्रतिदिनं निश्वसति, अहो! केनाप्युपयेनोदकं न प्रादुर्भवति, वृथा श्रमो जातः इति।

एकदा तत्र तडागपाल्युपरि उपविष्टे श्रेष्ठिनि जलाऽऽगमचिन्तामग्रचित्ते सति सहसा गगने अमानुषी वाक् उदचरत्- किमिति भो वणिकपुत्र! निश्वसिषि? द्वात्रिंशल्लक्षणयुक्तपुरुषस्य कण्ठरक्तेन यदा तडागं सिच्यते, तदाऽत्र विमलोदकम् उद्गमिष्यति, नान्यथा। तच्छ्रुत्वा तेन वणिजा कासारपरिसरे महदन्नसत्रं कारितम्। तस्मिन् सत्रे भोक्तं विदेशवासिनो जनाः सर्व्वे समायान्ति। तत्र स्थिताः अधिकारिणस्तेषां विदेशवासिनां पुरतः एवं वदन्ति- यः कोऽपि द्वात्रिंशल्लक्षणलक्षितः स्वकण्ठरुधिरेण तडागं सेचयिष्यति तस्मै शतभारं सुवर्णं दीयते इति। तद्वचः सर्व्वे श्रृण्वन्ति, परं न कोऽपि तत् सहसा अङ्गीकुरुते इति महच्चित्रं दृष्टम्।

## किं भवन्तः जानन्ति?



### पिपीलिकानां विश्रामः

पिपीलिकाः (Ants) कदापि न स्वपन्ति! ताः सम्पूर्णे दिवसे केवलं लघु-विरामान् (विश्रामं) स्वीकुर्वन्ति, किन्तु मानवाः इव गाढ-निद्रां न गच्छन्ति।

## गजस्य प्लवन-कला

गजः (Elephant) स्थूलकायः भारयुक्तः च भवति, तथापि सः जले अतीव उत्तमरीत्या तरितुं (Swim) शक्नोति। गजस्य शुण्डः जलस्य अन्तः श्वसन-नलिका इव कार्यं करोति।

# शिक्षकदिवसे बिहारस्य ३८ उत्कृष्ट-शिक्षकाणां सम्मानम्,शिक्षणे एआई इत्यस्य समावेशः, चतुर्थचरणशिक्षकनियुक्तेः प्रक्रिया आरब्धा




**पाटलिपुत्रम्/भागलपुरम् ५ सितम्बर २०२६ हिमसंस्कृतवार्ताः डॉ विमलेश झा**

पटना-स्थिते श्रीकृष्ण-मेमोरियलसभागारे राज्यस्तरीयशिक्षकसम्मानसमारोहः आयोजितः। बिहारस्य माननीयः मुख्यमन्त्री श्री सम्राट् चौधरीमहोदयः मुख्यातिथिरूपेण उपस्थितः अभवत्। मुख्यमन्त्रिणा शिक्षाक्षेत्रे उल्लेखनीयं योगदानं दत्तवतां ३८ सर्वकारी-शिक्षकाणां 'राजकीय-शिक्षक-पुरस्कारः २०२६'इत्यनेन सम्मानं कृतम्। तेन तेभ्यः मञ्चे पदकं, प्रशस्तिपत्रं, सम्मानराशिः च प्रदत्ता। बिहारशिक्षाविभागेन राज्यस्य सर्वेभ्यः ३८ जनपदेभ्यः एकैकः उत्कृष्टशिक्षकः चितः। शैक्षणिकयोगदानम्, नवाचारः, छात्रसमर्पणम्, उल्लेखनीयकार्यं च चयनस्य आधारः आसीत्। ३८ शिक्षकेषु १७ महिला-शिक्षिकाः अपि सन्ति। ग्रामीणदूरस्थक्षेत्रेषु बालिकाशिक्षायाः उन्नतौ महिला शिक्षिकाणां महत्वपूर्णा भूमिका भवति। अस्मिन् अवसरे मुख्यमन्त्रिणः अवदत्- "शिक्षकः एव समाजस्य स्वरूपं परिवर्तयति।शिक्षकः केवलं पाठ्यक्रमं न पाठयति, अपितु व्यक्तित्वं, चिन्तनं, भविष्यं च निर्माति। बिहारप्रदेशे एव नालन्दा-विक्रमशिला विश्वप्रसिद्धज्ञानपरम्परायाः भूमिः आसीत्। तस्य गौरवशालिनः धरोहरस्य अग्रे नयनस्य दायित्वं अद्य शिक्षकाणां स्कन्धेषु अस्ति।" मुख्यमन्त्री अवदत् यत्- "बिहार-सर्वकारः शिक्षाक्षेत्रे मूलभूतसंरचनातः मानवसंसाधनआधुनिकतकनीकपर्यन्तं सर्वेषु स्तरेषु सुधाराय प्रयतते। विद्यालयेषु उत्तमसुविधाः, शिक्षकनियुक्तिः, प्रशिक्षणं, यान्त्रिकसंसाधनानां उपलब्धता च सर्वकारस्य प्राथमिकता अस्ति।" बालकान् केवलं पारम्परिकपठनपर्यन्तं सीमितं न कृत्वा आधुनिकतकनीकेन भविष्यस्य आवश्यकतानुसारं च सज्जीकर्तुम् अस्माकं लक्ष्यं भवेत्। समारोहे बिहारशिक्षाविभागः तथा गूगलइंडिया इत्यनयोः मध्ये महत्वपूर्णस्य सहमतिपत्रस्य उपरि हस्ताक्षरम् अभवत्। अस्य उद्देश्यं राज्यस्य सर्वकारीयविद्यालयानां शिक्षकान् कृत्रिम-बुद्धिमत्ता (AI) तथा आधुनिकडिजिटल-तकनीकीनां उपयोगाय प्रशिक्षितुं सक्षमं च कर्तुम् अस्ति। एतत् बिहारस्य शिक्षाव्यवस्थायां तकनीकीपरिवर्तनदिशि बृहत् कार्यं मन्यते। शिक्षकाः आधुनिकतकनीकी-उपकरणैः, एआईआधारितशैक्षणिकसंसाधनैः च योजयिष्यन्ते। सर्वकारस्य लक्ष्यं नूतनतकनीकेः उपयोगेन बालकान् वैश्विकावश्यकतानुसारं उत्तमशिक्षां दातुम् अस्ति। शिक्षकान् एतादृशैः यान्त्रिक-उपकरणैः परिचाययितुं योजना यैः पठनं अधिकं प्रभावी, रोचकं, छात्र-आवश्यकतानुसारं च भवेत्। भविष्ये एआईआधारिता तकनीकी शिक्षकान् पाठ्यसामग्री-निर्माणे, छात्राणां अधिगमक्षमततावगमने, नूतनपठनपद्धति-अङ्गीकरणे च सहयोगं करिष्यति।मुख्यमन्त्री अवदत् - "राज्यसर्वकारः बिहारस्य बालकेभ्यः गुणवत्तापूर्णा शिक्षा, उत्तमशैक्षणिकवातावरणं च दातुं निरन्तरं कार्यं करोति।" चतुर्थचरणशिक्षकनियुक्तिमाध्यमेन ३२,००० संख्यातः अधिकानां नवीनशिक्षकाणां नियुक्ति-प्रक्रिया आरब्धा अस्ति।अधिकशिक्षकनियुक्त्या छात्रशिक्षकानुपाते वृद्धिःभविष्यति।



**हिमसंस्कृतवार्ताः, ईदरधीरजः**

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य काश्चन विचित्राः वार्ताः मया आनीताः।

**नन्दिनी-** प्रथमा वार्ता का अस्ति?

**काव्या-** केनचित् पत्या स्वपत्न्याः रहस्यं ज्ञातुं स्वचालित-सम्मार्जक-यन्त्रस्य उपयोगः कृतः। यन्त्रेण तस्याः जारसम्बन्धः दृष्टः। तेन विवाहविच्छेदः प्राप्तः परन्तु गुप्तरूपेण गुप्तचित्रीकरणेन सः पञ्चमासान् यावत् कारागारं प्रेषितः।

**नन्दिनी-** अहो! पर-रहस्यज्ञानेन तेन महती विपत्तिः प्राप्ता। अन्या वार्ता का?

**काव्या-** चीनदेशे शेन्झेन-नगरे केनचित् पुरुषेण कण्डूयन-आपणः आरब्धः। तत्र जनाः धनं दत्त्वा अन्यैः स्वशरीरे कण्डूयनं कारयन्ति। प्रतिमासं तेन प्रभूतं धनं प्राप्तम्।

**नन्दिनी-** कण्डूयनेन अपि धनार्जनं जातम् इति अतीव विचित्रम्! अग्रे किं जातम्?

**काव्या-** अमेरिकादेशे यू- एस- ओपन- टेनिस-क्रीडायां सबालेङ्का-नाम्न्या क्रीडिकया क्रीडा स्थगिता। यतः क्रीडाङ्गणे मादक-धूम्रवर्तेः दुर्गन्धः प्रसृतः। दुर्गन्धेन सा महतीं बाधाम् अनुभूतवती अस्ति।

**नन्दिनी-** क्रीडाकाले दुर्गन्धः अतीव बाधकः खलु! अन्तिमा वार्ता का?

**काव्या-** चीनदेशे विशिष्टं छत्राकं प्राप्तम्। यदि तत् अपक्वं खाद्यते, तर्हि जनैः लघ्वाकाराः मानवाः दृश्यन्ते। वैज्ञानिकैः तस्मिन् किमपि मादकद्रव्यं न प्राप्तम्। परन्तु एतत् छत्राकं खादित्वा जनाः भ्रान्तिं प्राप्तवन्तः सन्ति।

**नन्दिनी-** अहो! छत्राकभक्षणेन वामनाः दृष्टाः इति महद् आश्चर्यम्।



## "गुरुर्ब्रह्मा गुरुर्विष्णुः..." मन्त्रध्वनिना गुञ्जितं डिपीएस बोकारो, शिक्षकदिवसः सोल्लासम् आचरितः

**"शिक्षक-विद्यार्थिनोः मध्ये विश्वाससम्बन्धस्य सम्मानः आवश्यकः" -प्राचार्यः डॉ. गंगवारः**

हिमसंस्कृतवार्ताः- सौरभः दे, बोकारो।

देशस्य प्रथमोपसभापतिना तथा द्वितीयेन राष्ट्रपतिना, महान् शिक्षाविदा डॉ. सर्वपल्ली राधाकृष्णनेन सम्बद्धस्य जयन्तीदिवसस्य उपलक्ष्ये शनिवासरे दिल्ली पब्लिक स्कूल (डिपीएस), बोकारो इत्यत्र शिक्षकदिवसः हर्षोल्लासेन श्रद्धापूर्वकं च आचरितः। अस्मिन् अवसरे विद्यार्थिभिः शिक्षकैश्च गीत-सङ्गीत-नृत्यादीनां मनोहराभिः प्रस्तुतिभिः विद्यालयपरिसरः सतरङ्गैः उल्लासैः परिपूर्णः अभवत्।

विद्यार्थिनः स्वशिक्षकाणां प्रतिरूपमिव भूत्वा शिक्षकदिवसस्य विशेषप्रार्थनासभायाः सर्वाः कार्यवाह्यः स्वयमेव सम्पन्नवन्तः। उत्सवपूर्णे वातावरणे कार्यक्रमस्य शुभारम्भः विद्यालयस्य प्राचार्येण डॉ. ए. एस. गंगवारेण डॉ. राधाकृष्णनस्य चित्रे माल्यार्पणेन दीपप्रज्वलनेन च कृतः। ततः छात्र-छात्राभिः प्राचार्याय पुष्पगुच्छानि शुभकामनापत्राणि च समर्पितानि।

विद्यालयस्य वरिष्ठविभागे "गुरुर्ब्रह्मा गुरुर्विष्णुः..." इति मन्त्रस्य मधुरध्वनिना सम्पूर्णं वातावरणं गुञ्जितम्। विद्यार्थिभिः "मोहे लागी लगन गुरु चरणन की..." इति भावपूर्णया प्रस्तुत्या सर्वेषां मनांसि आकृष्टानि। तदनन्तरम् आर्केस्ट्रा-प्रस्तुतौ विद्यार्थिभिः विविधवाद्ययन्त्राणां मधुरसङ्गत्या लोकप्रियगीतानां मनोहारिणी मेडले-प्रस्तुतिः कृता, या उपस्थितैः सर्वैः प्रशंसिता।

अनन्तरं श्रीकृष्ण-अर्जुनयोः संवादम् आधारीकृत्य गुरु- शिष्यसम्बन्धस्य महत्त्वं नृत्यप्रस्तुत्या विद्यार्थिभिः अत्यन्तं प्रभावपूर्णतया प्रदर्शितम्। अपरतः प्राथमिकविभागे छात्र-छात्राभिः शिक्षकाणां समर्पितं मधुरगीतं तथा श्रीकृष्णविषयकं मनोहरं नृत्यं प्रस्तुतम्। एताभिः प्रस्तुतिभिः उपस्थिताः सर्वे दर्शकाः मन्त्रमुग्धाः अभवन्।